## ६४. लोकहितं करोतु

स्मप्रयोगः

विनुता - रामलालस्य पत्नी मृता इति। भवती जानाति वा ?

सुमेधा - कदा भोः। तस्याः किम् अभवत् ?

विनुता - ह्यः सायङ्काले मृतवती। तस्याः दिनद्वयतः ज्वरः आसीत् इति। ह्यः प्रातः आरभ्य हृदयवेदना इति वदति स्म। प्रायः तस्याः पतिः अपि गृहे नासीत् इति।

सुमेधा - अहो कष्टम्.... । सा जलजा तु सम्यक् गायति स्म। बालान् अपि प्रीत्या पाठयति स्म। सर्वदा सौहार्देन व्यवहारं करोति स्म। एवं..... न भवेत् भोः....

विनुता - किं कर्तुं शक्नुमः। सर्वं दैवलीला...। ललाटलिखिता रेखा। जलजायाः समीपे कति विद्यार्थिनः पठन्ति स्म।

सुमेधा - जलजायाः समीपे चत्वारिंशत् बालिकाः गच्छन्ति स्म। सा ताः सुमधुरं, सुललितं च पाठयति स्म। तथापि शुल्कम् अधिकं न स्वीकरोति स्म।

विनुता - तादृशाः जनाः इदानीं विरलाः भोः। किञ्चित् किमपि पाठयित्वा अत्यधिकं स्वीकुर्वन्ति।

सुमेधा - अतः एव सा अधिकां वेदनां विना अनायासं मरणं प्राप्तवती स्यात्।

विनुता - सत्यम्। अतः एव वदन्ति - 'यावत् जीवति तावत् सुकार्यं करोतु' इति।